षः। ततो दोषजेष्वपि प्राक्तनं दुष्कर्मैव कारणम् तत् कथं दोषजा इत्युच्यते। दोषजेष्वपि वस्तुतः व्यादि कारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहार दूषिता दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यन्ते इति समाधिः। कर्मदोषोद्भवाः "स्वल्पदोषा गरीयांसोऽधमास्ते कर्मदोषजाः"। अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वन्तत्कर्मक्षयादेव क्षीणं भवति। दोषाः स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति दोषाणां कारणता मन्यन्त इति। "कर्मक्षयात् कर्मजता दोषजाः स्वस्वभेषजैः। कर्मदोषोद्भवा यान्ति कर्मदोषक्षये क्षयम्"। दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणं दुष्कर्म तद्भोगजार्थं द्रव्यक्षयादिजनित दुःखभोगेन कटुतिक्तकषायाद्यहृद्यभक्षणादिजनितदुःखभोगेन च क्षयं यान्ति। शेषा दुष्टा हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः। "साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः। सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते"। याप्यलक्षणमाह "यापनीयन्तु तं विद्यात् क्रिया धारयते क्षणम्" "याप्यनीयन्तु हन्तायां सद्यो यस्य विनश्यति। प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्। प्रपतिष्यदिवागारं स्तम्भो यत्नेन योजितः। साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतान्तथा। घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्"। अक्रियावतां चिकित्सारहितानाम्। अथोपद्रवस्य लक्षणम्। "रोगारम्भकदोषस्य प्रकोपादुपजायते। योऽन्यो विकारः स बुधैरुपद्रव इहोदितः"।

**रोगशिला** स्त्री रोगाय तन्निवृत्तये शिला। मनःशिलायाम् राजनि०। [क्विप् रोगहन्। रोगहन्तरि-वैद्यादौ त्रि०।

**रोगह** न० रोगं हन्ति हन-ड। १औषधे शब्दच०। हन-

**रोगहर** त्रि० रोगं हरति हृ-अच्। व्याधिनाशके द्रव्यादौ तच्च सुश्रुतादौ दृश्यम्।

**रोगहारिन्** पु० रोगं हरति हृ-णिनि। १चिकित्सके वैद्ये अमरः। २रोगनाशके त्रि०।

**रोगितरु** पु० रोगिप्रियस्तरुः शाक०। अशोकवृक्षे राजनि०।

**रोगिन्** त्रि० रोग+अस्त्यर्थे इनि रुज-घिनुण् वा। व्याधियुक्ते राजनि० स्त्रियां ङीप्।

**रोचक** त्रि० १रुचिकारके। २क्षुधायां हेमच०। ३कदल्यां शब्दर०। ४राजपलाण्डौ ५अवदंशे (चाटनि) च राजनि० ६ग्रन्थिपर्णभेदे विश्वः।

**रोचन** पु० रुच-ल्यु रोचयति वा ल्यु। १कूटशाल्मलिवृक्षे २श्वेतशोभाञ्जने, ३पलाण्डौ ४दाड़िमे च राजनि०। ५करञ्जे, ६अङ्कोठे, ७आरग्वधे च मेदि०। ८उत्तमायां नार्य्यां ९रक्तकह्लारे स्त्री मेदि० टाप्। ११रुचिकारके त्रि०।

**रोचनक** पु० रोचनाय रुचिजननाय कायति कै-क। जम्बीरे राजनि०। [म्बीरभेदे २चिर्भट्यां स्त्री राजनि०

**रोचनफल** पु० रोचनं रुचिकरं फलमस्य। १वीजपूरके ज-

**रोचनी** स्त्री रोचयतीति कर्त्तरि ल्युट् गौरा० ङीष्। १मनःशिलायाम् हेमच० २गोरोचनायां ३आमलक्याम् राजनि० ४श्वेतत्रिवृति, ५गन्धद्रव्यभेदे च (गुड़ारोचना) अमरः। [२रुचियुक्ते त्रि०।

**रोचमान** पु० रुच-शानच्। १अश्वग्रीवास्थरोमावर्त्ते त्रिका०।

**रोचिष्णु** त्रि० रुच-इष्णुच्। १दीप्तिशीले २रुचिशीले च।

**रोचिस्** न० रुच-इसुन्। प्रभायाम् अमरः।

**रोची** स्त्री रोचयति रुच्-णिच्-अच् गौरा०ङीष्। हिलमोचिकायाम् शब्दर०।

**रोटिका** स्त्री रुट-ण्वुल्। गोधूमादिचूर्णनिर्मिते पिष्टकभेदे (रुटी) भावप्र० कृतान्नशब्दे २१८१ पृ० दृश्यम्।

**रोड** अनादरे भ्वा०पर०सक०सेट्। रोडति अरोडीत् ऋदित् चङि न ह्रस्वः।

**रोदन** न० रुद-ल्युट्। १क्रन्दने २अश्रुणि मेदि०। करणे ल्युट् ङीप्। ३दुरालभायाम् अमरः। संज्ञायां कन् अत इत्त्वम्। रोदनिका ४यवासायाम् अमरः।

**रोदस्** न० रुद-असुन्। १स्वर्गे २भूमौ च अमरः। गौरा० ङीष् रोदसीत्यप्यत्र। २द्यावाभूम्योः स्त्री द्वि०व०अमरः। ३पृथिव्यां निघण्टुः। [भरतः।

**रोध** पु० रुध-घञ्। १रोधने २आवरणे च ३नदीतीरे

**रोधन** त्रि० रुणद्धि रुध-ल्यु। १रोधकर्त्तरि। भावे ल्युट् २प्रतिबन्धे न०।

**रोधस्** न० रुध-असुन्। नद्यादिकूले अमरः।

**रोधवक्रा** स्त्री रोधेन तीरेण वक्रा। नद्यां निघण्टुः। रोधोवक्राऽप्यत्र त्रिका०।

**रोध्र** न० रुध-रन्। १पापे २अपराधे ३लोध्रवृक्षे पु० मेदि०।

**रोध्रपुष्प** पु० रोध्रस्य लोध्रस्येव पुष्पमस्य। मधूकवृक्षे (मौल) राजनि०। [धातकीवृक्षे (धाइफुल) राजनि०।

**रोध्रपुष्पिणी** स्त्री रोध्र इव पुष्प्यति पुष्प विकाशे णिनि।

**रोप** पु० रुह-णिच्-हस्य पः कर्मणि अच्। १वाणे अमरः भावे अच्। २रोपणे धान्यादेर्जननाय ३अङ्कुरारोपणे च मेदि० ४छिद्रे न० हेमच०।